# Nirvāṇaṣaṭkam

## निर्वाणषट्कम्

मनोबुद्ध्यहङ्कारचित्तानि नाहं  न च श्रोत्रजिह्वे न च घ्राणनेत्रे ।

न च व्योमभूमिः न तेजो न वायुः  चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ १ ॥

**manobuddhyahaṅkāracittāni nāhaṁ**
**na ca śrotrajihve na ca ghrāṇanetre ।**
**na ca vyomabhūmiḥ na tejo na vāyuḥ**
**Cidānandarūpaḥ Śivo'haṁ Śivo'ham ।।1।।**

न च प्राणसंज्ञो न वै पञ्चवायुः   न वा सप्तधातुर्न वा पञ्चकोषाः ।

न वाक्पाणिपादं न चोपस्थपायू  चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ २ ॥

**na ca prāṇasañjño na vai pañcavāyuḥ**
    **na vā saptadhāturna vā pañcakoṣāḥ |**
**na vākpāṇipādaṁ na copasthapāyū**
    **Cidānandarūpaḥ Śivo'haṁ Śivo'ham ||2||**

न मे द्वेषरागौ न मे लोभमोहौ   मदो नैव मे नैव मात्सर्यभावः।

न धर्मो न चार्थो न कामो न मोक्षः   चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ३ ॥

**na me dveṣarāgau na me lobhamohau**
    **mado naiva me naiva mātsaryabhāvaḥ |**
**na dharmo na cārtho na kāmo na mokṣaḥ**
    **Cidānandarūpaḥ Śivo'haṁ Śivo'ham ||3||**

न पुण्यं न पापं न सौख्यं न दुःखं  न मन्त्रो न तीर्थं न वेदा न यज्ञाः।

अहं भोजनं नैव भोज्यं न भोक्ता   चिदानन्दरूपः शिवोऽहं शिवोऽहम्॥ ४ ॥

**na puṇyaṁ na pāpaṁ na saukhyaṁ na duḥkhaṁ**
    **na mantro na tīrthaṁ na vedā na yajñāḥ |**
**ahaṁ bhojanaṁ naiva bhojyaṁ na bhoktā**
    **Cidānandarūpaḥ Śivo'haṁ Śivo'ham ||4||**

न मे मृत्युशङ्का न मे जातिभेदः   पिता नैव मे नैव माता न जन्म।

न बन्धुर्न मित्रं गुरुर्नैव शिष्यः   चिदानन्दरूपः शिवोऽहं शिवोऽहम्॥ ५॥

**na me mṛtyuśaṅkā na me jātibhedaḥ**
    **pitā naiva me naiva mātā na janma |**
**na bandhurna mitraṁ gururnaiva śiṣyaḥ**
    **Cidānandarūpaḥ Śivo'haṁ Śivo'ham ||5||**

अहं निर्विकल्पो निराकाररूपः  विभुर्व्याप्य सर्वत्र सर्वेन्द्रियाणाम् ।

सदा मे समत्वं न मुक्तिर्न बन्धः  चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ६ ॥

**ahaṁ nirvikalpo nirākārarūpaḥ**

**vibhurvyāpya sarvatra sarvendriyāṇām |**

**sadā me samatvaṁ na muktirna bandhaḥ**

**Cidānandarūpaḥ Śivo'haṁ Śivo'ham ||6||**